International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(6): 62-64
© 2026 IJMH
www.themultijournal.com

Received: 19-10-2026
Accepted: 05-11-2026
Publish : 06-11-2026

विकास आचार्यः
विभाग - शुक्लयजुर्वेद माध्यन्दिन,
श्री वेङ्कटेश्वर वेदविश्वविद्यालयः
तिरुपतिः

Correspondence:
विकास आचार्यः
विभाग - शुक्लयजुर्वेद माध्यन्दिन,
श्री वेङ्कटेश्वर वेदविश्वविद्यालयः
तिरुपतिः

वाजसनेयिप्रातिशाख्ये संस्कारविमर्शः

विकास आचार्यः

वाजसनेयिप्रातिशाख्यं शुक्लयजुर्वेदस्य **माध्यन्दिनकाण्व**शाखयोः वैदिकस्वरवर्णोच्चारणादि- नियामकं प्रातिशाख्यग्रन्थः। अस्य ग्रन्थस्य प्रणेता कात्यायनमहर्षिरिति प्रसिद्धिः। अयं ग्रन्थः वेदमन्त्राणाम् उच्चारणस्य, स्वरस्य, वर्णानां संहितायां परस्परसम्बन्धस्य च विशिष्टान् नियमान् प्रतिपादयति।

अस्मिन् ग्रन्थे संस्कारविषये **संस्कार-सन्धी** शब्दौ प्रयुक्तौ। भाष्यकारोवटस्यानुसारं **संस्कारो लोपागमवर्णविकारप्रकृतिभावलक्षणः**[1]। तदनुसारेण **वर्णरत्नप्रदीपिकाशिक्षायामपि संस्कारविधिः** इति प्रतिपादितम्। **संस्कार**श्चतुर्विधो भवति- **लोपागमौ विकारश्च प्रकृत्या भवनं तथा**[2]। **याज्ञवल्क्यशिक्षायाम्** एतदेव **सन्धि** इति उक्तम्। **सन्धिश्चतुर्विधो भवति- लोपागमविकाराः प्रकृतिभावश्चेति**[3]। **लोपः** (Elision), **आगमः** (Insertion), **वर्णविकारः** (Modification), **प्रकृतिभावः** (Natural state)। **सन्धि-संस्कार**-उभौ पर्यायवाचिनौ शब्दौ स्तः। **संस्कार**शब्दः **सम्** उपसर्गपूर्वक-**कृ**धातोः निष्पन्नः। **सन्धि**शब्दः **सम्** उपसर्गपूर्वक-**धा**धातोः निष्पन्नः। उभयोः शब्दयोः सामान्यतोऽर्थः **संयोगः** अथवा **मेलनम्** इति। प्रातिशाख्यग्रन्थेषु वर्णानां सामीप्यमात्रमेव **सन्धिः संस्कारः** वा इत्युच्यते। तत्र विकारो मा वा भवतु। परन्तु लौकिकसंस्कृते **सन्धि**शब्दस्य प्रयोगः तत्रैव क्रियते यत्र वर्णानां सन्निकर्षेण कोऽपि विकारो जायते। यत्र वर्णानां समीपे आगमनेऽपि कोऽपि विकारो न भवति, तत्र **सन्धेः** अभावः मन्यते।

पदान्तपदाद्योः सन्धिः[4]। **सन्धिः** सामान्यतः पदान्ते पदादौ च भवति। **आचार्योवटेन** चतुर्विधाः **सन्धयः** प्रतिपादिताः – **स्वरयोः, व्यञ्जनयोः, स्वरव्यञ्जनयोः, व्यञ्जनस्वरयोश्च**[5]। तदनुसारेणैव शिक्षाकृद्भिः **अमरेशैः** अपि **सन्धि** इति उक्तम्।

स्वरयोर्वा हलयोर्वा स्वरव्यजनयोरुत[6]॥

स्वरसन्धिः – पदान्ते-पदादौ स्वरवर्णानां योगे **स्वरसन्धिः** इत्युच्यते। यथा- **आ+इदम्**[7] **एदम्**[8]॥

व्यञ्जनसन्धिः – पदान्ते पदादौ च व्यञ्जनानां योगे **व्यजनसन्धिः** इत्युच्यते। यथा- **सम्+वपामि सम्वपामि**[9]॥

स्वर-व्यञ्जनसन्धिः – पदान्ते स्वरे पदादौ च व्यञ्जने सति तयोः मेलनं **स्वर-व्यञ्जनसन्धिः** उच्यते। यथा- **इषे+त्वा इषेत्वा**[10]॥

व्यञ्जन-स्वरसन्धिः – पूर्वपदान्ते स्थिते व्यञ्जनवर्णे उत्तरपदादौ च स्थिते स्वरवर्णे तयोः मेलनं **व्यञ्जन-स्वरसन्धिः** इत्युच्यते। यथा- **उत्+एनम्**[11] **उदेनम्**[12]॥

स्वरसंस्कारयोश्छन्दसि नियमः[13]॥ एतेन सूत्रेण स्पष्टं भवति यत् संस्कारस्य मुख्यतया चत्वारो भेदाः प्रतिपादिताः – **१. वर्णलोपः। २. वर्णागमः। ३. वर्णविकारः। ४. प्रकृतिभावः।**

१. वर्णलोपसंस्कारः - लुप् (छेदन-नाशनयोः) धातुः, **घञ्**-प्रत्ययः। लुप्धातोर्भावे **घञि** प्रत्यये लोपशब्दो निष्पद्यते। **लुप्+घञ् = लोपः**। लुप्यते अनेनेति **लोपः**। लोपनं लुप्तिर्वा लोपः। **वर्णस्यादर्शनं लोपः**[14]। सन्धिप्रकरणे विधिना कस्यचिद्वर्णस्यानुपलब्धिर्भवति, सा लोपसंज्ञा भवति।

लोपस्य उदाहरणम् –

मन्त्रः – **वायवस्थ**[15]॥

अस्य मन्त्रभागस्य **वायवः+स्थः**[16] इति पदपाठः। अत्र वायवः इत्यत्र पदस्यान्ते **विसर्जनीयः** दृश्यते अनन्तरं **स्थः** इति पदमस्ति। एवं स्थिते **लुङ्मुदि जित्परे**[17] इत्यनेन सूत्रेण तत्र **थ**कार-रूपजित्संज्ञापरक- **स**काररूपमुद्वर्णे परे, **विसर्गः** लुप्यते। तेन **वायवस्थ** इति पठ्यते।

वैदिकपाठे वर्णलोपस्य ज्ञानं महत्वपूर्णमस्ति, यतः तेन मन्त्रस्य संहितापाठः, पदपाठः, तथा उच्चारणक्रमश्च सम्यग्ज्ञायते।

२. वर्णागमसंस्कारः –

आ-उपसर्गात्, **गम्** (गमनार्थे) धातुः, **घञ्**-प्रत्ययः। **ग्रहवृदृनिश्चिगमश्च**[18] इत्यनेन सूत्रेण अप्प्रत्यये **आगम**शब्दो निष्पद्यते। **आ+गम्+घञ् = आगमः।** यः वर्णः पूर्वं नास्ति, नियमविशेषेण अनन्तरं आगच्छति, स **आगम-संज्ञकः**। यत्र स्थले विद्यमानः वर्णः आगम्यमानतुल्यः अधिकः श्रूयते, स **आगम** इत्युच्यते। **शत्रुवदादेशः, मित्रवदागमः** इति वैयाकरणोक्तिः[19]। तृतीयाविभक्त्या यो निर्दिश्यते स **आगम** इति ज्ञातव्यः, तदुच्यते- **तेनेत्यागमः**[20]॥

आगमस्य प्राचीनपर्यायः **'उपजनः'** इति उच्यते। उपजनशब्द-स्यास्मिन्नर्थे व्यवहारः आचार्ययास्केन **निरुक्ते** कृतः। **अथापि वर्णोपजनः आस्थद्वारो भरुजेति**[21]। ऋक्प्रातिशाख्ये **आगम-उपजन**शब्दयोः उभयोरपि व्यवहारः उपलब्धः भवति। वाजसनेयि-प्रातिशाख्ये **आगमः उवटानन्त**भाष्यकारैः **व्यवधानम्** इति निरूपितम्। अतः **आगमः व्यवधानम्** इत्यपि वक्तुं शक्यते। यतः द्वयोः पदयोः मध्ये अथवा वर्णयोः मध्ये आगतः वर्णः पूर्ववर्तिपरवर्तिशब्दानां मध्ये **व्यवधानस्य** कार्यं करोति। तदुच्यते - **अन्तरेण पर्वणी**[22] इति परिभाषा सूत्रम्।

आगमस्य उदाहरणम् –

मन्त्रः – अर्वाङ्क्स्वः[23]॥

अस्य मन्त्रभागस्य **अर्वाङ्+स्वः**[24] इति पदपाठः। अत्र **अर्वाङ्** इत्यत्र पदस्यान्ते ङकारः दृश्यते। अनन्तरं **स्वः** इति पदमस्ति। एवं स्थिते **ङ्नौ क्ताभ्यां सकारे**[25] इत्यनेन सूत्रेण तत्र **स**कारे परे ङकारात् परो **क**कारागमः आप्नोति। **अर्वाङ्+क्+स्वः** वर्णसम्मेलने **अर्वाङ्क्स्वः** इति पठ्यते।

मन्त्रः – प्रयन्त्स्वः[26]॥

अस्य मन्त्रभागस्य **प्रयन्+ स्वः**[27] इति पदपाठः। अत्र **प्रयन्** इत्यत्र पदस्यान्ते **न**कारः दृश्यते। अनन्तरं **स्वः** इति पदमस्ति। एवं स्थिते **ङ्नौ क्ताभ्यां सकारे**[28] इत्यनेन सूत्रेण तत्र **स**कारे परे **न**कारात् परः **तकारागमः** आप्नोति। **प्रयन्+त्+स्वः** वर्णसम्मेलने, तेन **प्रयन्त्स्वः** इति पठ्यते।

३. वर्णविकारसंस्कारः –

वि-उपसर्गात्, **कृ** (करणे) धातुः, **घञ्**-प्रत्ययः। **वि+कृ+घञ् = विकारः**। विकृतिरेव **विकारः।** प्रकृतौ यत् विशेष-परिवर्त्तनम्, स **विकारः।** प्रकृते स्वरूपे परिवर्तनं यत् भवति, स्वर-वर्ण-लक्षणादीनां **आदेश**रूपेण यः भेदः जायते, स **विकारः** इति निगद्यते। यत्र पदादिप्रकृतिस्थले यस्य वर्णस्य स्थाने अन्यवर्णः भवेत्, सगुणो वा विगुणो वा स **विकारः** इति कथ्यते। **आगम**प्रक्रियायाम् अतिरिक्त-वर्णस्य प्रवेशः भवति, किन्तु **विकारप्रक्रियायां** विद्यमानस्य वर्णस्य **स्वरूपमेव** परिवर्तते। **वर्णविकारः** सन्धिः एकं महत्त्वपूर्णमङ्गम्। पदान्ते पदादौ वा अन्तःपदे स्थितस्य स्वरवर्णस्य अथवा व्यञ्जनवर्णस्य विकारः **वर्णविकारः** इति कथ्यते।

१. विकारस्य उदाहरणम्-

मन्त्रः – द्रप्प्सस्ते[29]॥

अस्य मन्त्रभागस्य द्रप्प्सः+ते[30] इति पदपाठः। अत्र **द्रप्प्सः** इत्यत्र पदस्यान्ते **विसर्गः** दृश्यते। अनन्तरं **ते** इति पदमस्ति। एवं स्थिते **तथयोः सम्**[31] इत्यनेन सूत्रेण तत्र तकारे परे **विसर्गस्य** स्थाने **स**काररूपेण **विकार**माप्नोति। **द्रप्प्स+स्+ते** वर्णसम्मेलने तेन **द्रप्प्सस्ते** इति पठ्यते।

४. प्रकृतिभावसंस्कारः –

प्र उपसर्गपूर्वकात् **डुकृञ् करणे** इत्यस्माद्धातोः **क्तिन्**प्रत्यये कृते **प्रकृति**शब्दो निष्पद्यते। तस्याः भावः **प्रकृति**भावः। भावो नाम स्थितिः। भूधातोः घञि भावशब्दो निष्पद्यते। यदा पदं प्रकृतिरूपमेव तिष्ठति, न सन्धिः, न आदेशः, न विकारः, न लोपः च विहितः, तदा या अवस्था, स **प्रकृति**भावः इत्युच्यते। **अत्र च शिक्षावचनम्-**

प्रकृतिस्थस्तु यश्शब्दः संहितायां न दृश्यते।
तत्स्थाने च न शब्दोऽन्यस्य लोपी नश्वरोपमः ॥

संस्कारस्य सन्धेर्वा चतुर्षु भेदेष्वन्यतमः **प्रकृतिभावः** अपि भवति। प्रकृतिरित्यनेन शब्दस्य स्वकीयमूलरूपेणैवावस्थानस्य **प्रकृतिभावः** इत्युच्यते। पाणिनीयव्याकरणे **प्रकृतिभाव**स्य अर्थः सन्धिगतस्य **विकारस्याभावः।** परन्तुवैदिकप्रातिशाख्येषु शिक्षाग्रन्थेषु च **प्रकृति-भावः** स्वयं सन्धिरूपेणैव परिगण्यते। यद्यपि अस्मिन् सन्धौ किञ्चिन्मात्रमपि परिवर्तनं न दृश्यते, तथापि वैदिकसाहित्यस्य नियमानुसारं संहितापाठे **प्रकृतिभाव**प्राप्तानां पदानां सन्निकर्षो भवत्येव। स **प्रकृतिभावः** इत्युच्यते। वाजसनेयप्रातिशाख्ये प्रकृति-भावः **प्रकृत्या** इत्यनेन शब्देनापि निर्दिष्टः।

प्रकृतिभावस्य उदाहरणम् –

मन्त्रः – काऽईमरे[32]॥

अस्य मन्त्रभागस्य **का+ईमरे** इति पदपाठः, इति स्थिते **कण्ठ्यादिवर्ण एकारम्**[33] इति सूत्रेण **इवर्णे** परे, पूर्वस्थित-**आकार**-परवर्ती **ईकारो** मिलित्वा **ए**कारत्वं प्राप्तम्। एवं जाते **'का ध्रुवोति सदना होतारा ज्या स्वधा पृथिवि प्रतिमेमसदन्नश्यामाकर्मोर्ध्वमि-यमवस्तादुतास्तिषु**[34]' इति सूत्रेण **ईम्** परे **का** इत्येतत् पदं **प्रकृतिभाव**रूपेण भवति। **का+ईमरे** इत्यत्र उभयोः स्वरयोर्मध्ये **सन्धिर्न** दृश्यते। **अत्र च शिक्षावचनम्। द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते। विवृत्तिस्तत्र विज्ञेया 'यऽईशे' तु निदर्शनम्**[35]॥ एतादृशे स्थाने **विवृत्तिः** ज्ञातव्येति। तेन **काऽईमरे** इति पठ्यते।

उपर्युक्तविमर्शात् स्पष्टं भवति यत् वाजसनेयिप्रातिशाख्यशास्त्रे संस्कारस्य विशिष्टं शास्त्रीयं महत्त्वमस्ति। संस्कारनियमाः वैदिकमन्त्राणाम् अविकृतपाठस्य संरक्षणाय अत्यन्तम् उपयुज्यन्ते।

संस्कारनियमैः मन्त्राणाम् उच्चारणं शास्त्रानुसारं भवति। वर्णलोपागमादिनियमैः संहितापाठस्य पदपाठेन सह सम्बन्धः स्पष्टो भवति। एते संस्काराः वैदिकसंहितायाः वर्णव्यवस्थां, संहितापाठस्य स्वरूपं तथा शास्त्रविहितम् उच्चारणं च अवगन्तुं साहाय्यं कुर्वन्ति। विशेषतः वाजसनेयिप्रातिशाख्यस्याधारेण माध्यन्दिनसंहितायां संस्काराणां प्रयोगस्य सूत्रभाष्यप्रमाणैः, पदपाठसंहितापाठयोः तुलनया मन्त्रदृष्टान्तैः सह विस्तृतमध्ययनं वैदिकध्वनिविज्ञा-नस्यानुसन्धानक्षेत्रे महत्त्वपूर्णं स्थानं वहति।

मम शोधपत्रे वाजसनेयिप्रातिशाख्ये संस्कारविमर्शः कृतो वर्तते। अस्य ज्ञानेन प्रकृति-विकृतिपाठपठनार्थं सौलभ्यं भवति इति मम आशयः।

सन्दर्भग्रन्थसूची-

२. शुक्लयजुर्वेदमाध्यान्दिनीय संहिता, श्री वेद प्रकाशन, नाशिक, २०११

३. माध्यन्दिन-संहितायाः पदपाठः, युधिष्ठिरो मीमांसकः, रामलाल कपूर ट्रस्ट, सोनीपत-हरियाणा,२०१२

४. वाजसनेयि-प्रातिशाख्यम्, डा. वीरेन्द्र कुमार वर्मा, चौखम्बा संस्कृत प्रतिष्ठान, जवाहर नगर दिल्ली, २०१५

५. अष्टाध्यायी, डा. नरेश झा, चौखम्बा प्रकाशन, २०१४

६. याज्ञवल्क्य-शिक्षा, डा. दिव्यचेतनब्रह्मचारी, चौखम्बा प्रकाशन, २०१४

७. वर्णरत्नप्रदीपिकाशिक्षा, वि.एस् प्रतापचन्द्रशर्मा, श्री वेङ्कटेश्वर वेदविश्वविद्यालयः तिरुपतिः

८. लघुसिद्धान्तकौमुदी, गोविन्द प्रसाद शर्मा, चौखम्बा सुरभारती प्रकाशन, २०१९

९. यास्कप्रणीतं निरुक्तम्, उमाशंकरशर्मा ऋषि चौखम्बा विद्याभवन,२०२२

सन्दर्भ

1. वा.प्रा. १.१ उवट
2. व.प्र.शि. १०६
3. या.शि. ८१ पृ.
4. वा.प्रा.३.३
5. वा.प्रा. ३.३
6. व.प्र.शि. १०७
7. मा.प.पा. ४.१
8. मा.सं.४.१
9. मा.सं.१.२२
10. मा.सं.१.१
11. मा.प. १७.४७
12. मा.सं. १७.५०
13. वा.प्रा. १.१
14. वा.प्रा. १.१४१
15. मा.सं.१.१
16. मा.प.१.१
17. वा.प्रा. ३.१३
18. अष्टा.३।३।५८
19. ल.सि.कौ. १०३ पृ.
20. वा.प्रा. १.१३७
21. नि.२.१
22. वा.प्रा. १.१३८
23. मा.सं.१५.४६
24. मा.प.१५.४२
25. वा.प्रा. ४.१५
26. मा.सं.३.६
27. मा.प.३.६
28. वा.प्रा. ४.१५
29. मा.सं.१.२६
30. मा.प.१.२६
31. वा.प्रा.३.८
32. मा.सं. २३.५५
33. वा.प्रा. ४.५४
34. वा.प्रा. ४.८७
35. या.शि.पृ.सं.८८